St. Claret College

Autonomous Bengaluru

II Semester B.Com, BBA, BCA, BA, B.Sc, TTM Examination May 2026

Language: Sanskrit-II, Code : SN224

Apareekshithakaram Grammar and Comprehension

Time : 3.00 Hrs. 4 **Max. Marks : 80**

THIS PAPER CONTAINS 3 PRINTED PAGE AND 8 PARTS

Instructions :
1) Verify and ensure that the question paper is completely printed.
2) Any discrepancies or questions about the exam paper must be reported to the COE within 1 hour after the examination.
3) Students must check the course title and course code before answering the questions.

SECTION - A

I **समीचिनं उत्तरम् चित्वा लिखत ।** **10x1=10**

Choose and write the correct answer.

1. पञ्चतन्त्रे 'अपरीक्षितकारकम्' कतमं तन्त्रम्?
   अ) द्वितीयम् आ) तृतीयम् इ) चतुर्थम् ई) पञ्चमम्
2. पञ्चतन्त्रस्य कर्ता क:?
   अ) गुणाढच: आ) सोमदेव: इ) विष्णुशर्मा ई) नारायण:
3. नरेण किं न कर्तव्यम्?
   अ) सुपरीक्षितम् आ) परीक्षितम् इ) विज्ञानम् ई) कुपरीक्षितम्
4. मणिभद्र: स्वप्ने क्षपणकरुपिणम् कम् अपश्यत्?
   अ) विद्यानिधिम् आ) जलनिधिम् इ) गुणनिधिम् ई) पद्यनिधिम्
5. कीदृशस्य स्वप्न निरर्थक: भवति?
   अ) स्वस्थस्य आ) योगिन: इ) निरोगिन: ई) चिन्ताग्रस्तस्य
6. ब्राह्मणी कस्मात् पुत्र: रक्षणीय: इति वदति?
   अ) सर्पात् आ) नकुलात् इ) चोरात् ई) सिंहात्
7. कृष्णसर्प क: मारयति?
   अ) ब्राह्मण: आ) ब्राह्मणी इ) गरुड: ई) नकुल:
8. धनहीनस्य जीवितं प्राय: कुत्र वरं भवति?
   अ) स्वगृहे आ) बन्धुगृहे इ) समाजे ई) वने
9. 'वडवानलम्' क: बिभर्तुं शक्नोति?
   अ) नदी आ) नद: इ) सर: ई) समुद्र:
10. ब्राह्मण पुत्रेषु कतम: सुवर्णं गृहित्वा निर्वृत्त:?
    अ) प्रथम: आ) द्वितीय: इ) तृतीय: ई) चतुर्थ:

SECTION - B

II **एकस्य प्रश्नस्य प्रबन्धरूपेण उत्तरं लिखत ।** **1x10=10**

Write an essay on any one of the following.

11. पञ्चतन्त्रं अधिकृत्य प्रबन्धं लिखत।

    Write an essay on Panchatantra.

12. चक्रधरा कथां लिखत।

    Write the story of Chakradhara.

SECTION - C

III **द्वयो: लघु टिप्पणीं लिखत।** **2x4=8**

Write short notes on ANY TWO.

13) शुकसप्तति: 14) सिंहासनद्वात्रिंशिका

15) ब्राह्मणी 16) नापित:

SECTION - D

IV **एतत् गद्यभागं कन्नड भाषयाम् आङ्गलभाषयां वा अनुवादत।** **1x10=10**

Translate the prose passage into Kannada or English

16) कस्मिंश्चिदधिष्टाने देवशर्मा नाम ब्राह्मण: प्रतिवसतिस्म। तस्य भार्या प्रसूता सुतम् अजनयत्। तस्मिन् एव दिने नकुली नकुलं प्रसूता। अथ सा सुतवत्सला दारकवत्तमपि नकुलं स्तन्य–दानाभ्यङ्गपोषणादिभि: पुपोष। परं तस्य न विश्वसिति।

अथवा

अस्ति दाक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरम्। तत्र मणिभद्रोनाम श्रेष्टी प्रति वसतिस्म। तस्य च धर्मार्थकाम मोक्षकर्माणि कुर्वतो विधिवशात् धनक्षय: सञ्जात:। ततो विभवक्षयात् अपमानपरमपरया परं विषादं गत:।

SECTION - E

V **चतुर्णा वाक्यानां ससन्दर्भं विवृणुत।** **4x4=16**

Explain with reference to context any FOUR sentence.

17) तृष्णैका तरुणायते।

18) यदनेन दुरात्मना दारको भक्षित:।

19) न बन्धुमध्ये धनहीन जीवितम्।

20) को बिभर्ति वडवानलम्।

21) साम्प्रतं को राजा धरणीतले?

22) उदार चरितानांतु वसुधैव कुटुम्बकम्।

SECTION - F

VI **23. संस्कृत भाषया उत्तराणि लिखत।**

Answer in Sanskrit.

अ. वाक्यदोषान् परिहरत। (पञ्चानामेव) **5x1=5**

1. सरोवर: परित: ग्रामा: भवन्ति।
2. रामाय सह सीता वनम् गच्छति।
3. गृहं बहि: छात्रा: सन्ति।
4. शिवं नम:।
5. बृक: सिंहेन बिभेति।
6. लव: विना कुश: न गायति।
7. कृष्ण: साकं वीणा गतवती।
8. शिव: कैलासे अधिवसति।

आ. एतेषां समासानाम् उदाहरणं लिखत (पञ्चानामेव) 5x1=5

1. द्वन्द्व समास: 2. बहुव्रीहि:
3. अव्ययीभाव: 4. द्विगु समास:
5. कर्मधारय 6. तत्पुरु
7. पञ्चमी तत्पुरुष: 8. सप्तमी तत्पुरुष:

SECTION - G

VII 24. **संस्कृत भाषया अनुवादं कुरुत।** 1x6=6

Translate the following prose passage into Sanskrit.

ರಾಜ ಅಶೋಕನು ಮಗಧರಾಜನಾದ ಚಂದ್ರಗುಪ್ತನ ಪೌತ್ರ. ಪಾಟಲೀಪುತ್ರ ಅವನ ರಾಜಧಾನಿಯಾಗಿತ್ತು. ಒಮ್ಮೆ ಅಶೋಕನು ಕಳಿಂಗರಾಜನ ಜೊತೆಗೆ ಯುದ್ಧ ಆರಂಭಿಸಿದನು. ಯುದ್ಧ ಭೂಮಿಯಲ್ಲಿ ಕಂಡ ಆಕ್ರಂದನದಿಂದ ಅವನ ಮನಸ್ಸು ಬದಲಾಯಿತು. ಅವನು ದಯಾಮಯಿಯಾಗಿ ಬೌದ್ಧ ಧರ್ಮವನ್ನು ಸ್ವೀಕರಿಸಿದನು.

King Ashoka was the grandson of Chandragupta, the King of Magadha. His capital was Pataliputra. Once King Ashoka waged war with the Kalinga army. After seeing the pain of the people in the battle field his mind transformed. Filled with compassion, he accepted Buddhism.

SECTION - H

VIII 25. **इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** 5x2=10

कश्चित् स्तेन: नगरस्य महाराज: बभूव। तस्यान्तिके कश्चित् कविवर: आगत्य तमधिकृत्य कानिचन पद्यानि पठित्वा मह्यं सम्भावनां देहि इति ययाचे। तत: स: राजा पार्श्वे स्थितान् आलोक्य अस्य कविवरस्य देहे वर्तमानानि सर्वाणि वस्त्राणि अपनीय एवं विद्रवयत इति आदिशत्। ते तथैव तस्य सर्वाणि वस्त्राणि अवलुप्य तं निरवासयन्। अत: नीच: महत्पदं प्राप्तोऽपि स्वीयं दु:शीलतां न त्यजति।

प्रश्ना:

1) क: नगरस्य महाराज बभूव?
2) महाराजस्य अन्तिके क: आगत:?
3) सम्भावनां देहि इति क: अयाचत्?
4) राजा पार्श्वे स्थितान् अवलोक्य किमिति अदिशत्?
5) क: महत्पदं प्राप्तोऽपि दु:शीलतां न त्यजति?

*****